श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीवेदान्तदेशिकविरचितात् श्रीरङ्गनाथपादुकासहस्रात्
नावल्पाक्कम् श्री उ. वे. वासुदेवाचार्यस्वामिना सङ्कलितम्

॥ श्री पादुका रामायणम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ श्री पादुका रामायणम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रस्तावपद्धतिः

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः॥ **1.1** ॥

भरताय परं नमोऽस्तु तस्मै
प्रथमोदाहरणाय भक्तिभाजाम्।
यदुपज्ञमशेषतः पृथिव्यां
प्रथितो राघवपादुकाप्रभावः॥ **1.2** ॥

वर्णस्तोमैर्वकुळसुमनोवासनामुद्वहन्तीम्
आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तम्।
पादे नित्यप्रणिहितधियं पादुके रङ्गभर्तुः
त्वन्नामानं मुनिमिह भजे त्वामहं स्तोतुकामः॥ **1.3** ॥

दिव्यस्थानात् त्वमिव जगतीं पादुके गाहमाना
पादन्यासं प्रथममनघा भारती यत्र चक्रे।
योगक्षेमं सकलजगतां त्वय्यधीनं स जानन्
वाचं दिव्यां दिशतु वसुधाश्रोत्रजन्मा मुनिर्मे॥ **1.4** ॥

नीचेऽपि हन्त मम मूर्धनि निर्विशेषं
तुङ्गेऽपि यन्निविशते निगमोत्तमाङ्गे।
प्राचेतसप्रभृतिभिः प्रथमोपगीतं
स्तोष्यामि रङ्गपतिपादुकयोर्युगं तत्॥ **1.5**॥

धत्ते मुकुन्दमणिपादुकयोर्निवेशात्
वल्मीकसम्भवगिरा समतां ममोक्तिः।
गङ्गाप्रवाहपतितस्य कियानिव स्यात्
रथ्योदकस्य यमुनासलिलाद्विशेषः॥ **1.6**॥

विज्ञापयामि किमपि प्रतिपन्नभीतिः
प्रागेव रङ्गपतिविभ्रमपादुके त्वाम्।
व्यङ्क्तुं क्षमास्सदसती विगताभ्यसूयाः
सन्तः स्पृशन्तु सदयैर्हृदयैः स्तुतिं ते॥ **1.7**॥

अश्रद्दधानमपि नन्वधुना स्वकीये
स्तोत्रे नियोजयसि मां मणिपादुके त्वम्।
देवः प्रमाणमिह रङ्गपतिस्तथात्वे
तस्यैव देवि पदपङ्कजयोर्यथा त्वम्॥ **1.8**॥

प्रभावपद्धतिः

वेदोपबृंहणकुतूहलिना निबद्धं
विश्वम्भराश्रुतिभवेन महर्षिणा यत्।
व्यासेन यच्च मधुसूदनपादरक्षे !
द्वे चक्षुषी त्वदनुभावमवेक्षितुं नः॥ **3.3**॥

प्रत्यक्षयन्ति परिशुद्धधियो यथावत्
रामायणे रघुपुरन्दरपादरक्षे !।

शश्वत् प्रपञ्चितमिदम्परयैव वृत्त्या
सङ्क्षेपविस्तरदशासु तवानुभावम्॥ **3.4**॥

तिष्ठन्तु श्रुतयस्ततोऽपि महितं जागर्ति तत् पादुके !
तत्तादृक्प्रथनाय तावकगुणग्रामाय रामायणम्।
यस्यासीदरविन्दसम्भववधूमञ्जीरशिञ्जारव -
स्पर्धादुर्धरपादबद्धफणितिर्वल्मीकजन्मा कविः॥ **3.6**॥

समर्पणपद्धतिः

भजामः पादुके ! याभ्यां
भरतस्याग्रजस्तदा।
प्रायः प्रतिप्रयाणाय
प्रास्थानिकमकल्पयत्॥ **4.1**॥

राज्यं विहाय रघुवंशमहीपतीनां
पौरांश्च पादरसिकान् पृथिवीं च रक्ताम्।
त्वामेव हन्त चरणावनि ! सम्प्रयास्यन्
आलम्बत प्रथममुत्तरकोसलेन्द्रः॥ **4.2**॥

प्राप्ते प्रयाणसमये मणिपादरक्षे !
पौरानवेक्ष्य भवती करुणप्रलापान्।
मञ्जुप्रणादमुखरा विनिवर्तनार्थं
रामं पदग्रहणपूर्वमयाचतेव॥ **4.3**॥

मत्वा तृणाय भरतो मणिपादरक्षे !
रामेण तां विरहितां रघुराजधानीम्।
त्वामेव सप्रणयमुज्जयिनीमवन्तीं
मेने महोदयमयीं मधुरामयोध्याम्॥ **4.4**॥

रामात्मनः प्रतिपदं मणिपादरक्षे !
विश्वम्भरस्य वहनेन परीक्षितां त्वाम्।
विश्वस्य देवि वहने विनिवेशयिष्यन्
विस्रब्ध एव भरतो भवतीं ययाचे॥ **4.5**॥

भक्त्या परं भवतु तद् भरतस्य साधोः
त्वत्प्रार्थनं रघुपतौ मणिपादरक्षे !।
केनाऽऽशयेन स मुनिः परमार्थदर्शी
भद्राय देवि ! जगतां भवतीमवादीत्॥ **4.6**॥

रामे वनं व्रजति पङ्क्तिरथे प्रसुप्ते
राज्यापवादचकिते भरते तदानीम्।
आश्वासयेत् क इव कोसलवासिनस्तान्
सीतेव चेत् त्वमपि साहसवृत्तिरासीः॥ **4.7**॥

पादावनि ! प्रभवतो जगतां त्रयाणां
रामादपि त्वमधिका नियतं प्रभावात्।
नो चेत् कथं नु भरतस्य तमेव लिप्सोः
प्रत्यायनं परिपणं भवती भवित्री॥ **4.8**॥

मन्ये नियुज्य भवतीं मणिपादरक्षे !
पार्ष्णिग्रहस्य भरतस्य निवारणार्थम्।
रत्नाकरं सपदि गोष्पदयन् विजिग्ये
रामः क्षणेन रजनीचरराजधानीम्॥ **4.9**॥

पादावनि ! प्रभुतरानपराधवर्गान्
सोढुं क्षमा त्वमसि मूर्तिमती क्षमैव।
यत् त्वां विहाय निहताः परिपन्थिनस्ते
देवेन दाशरथिना दशकण्ठमुख्याः॥ **4.10**॥

वाक्ये गरीयसि पितुर्विहितेऽप्यतृप्त्या
मातुर्मनोरथमशेषमवन्ध्ययिष्यन्।
मन्ये तदा रघुपतिर्भरतस्य तेने
मातस्त्वयैव मणिमौलिनिवेशलक्ष्मीम्॥ **4.11**॥

पादाम्बुजाद्विगळितां परमस्य पुंसः
त्वामादरेण विनिवेश्य जटाकलापे।
अङ्गीचकार भरतो मणिपादरक्षे !
गङ्गाधिरूढशिरसो गिरिशस्य कान्तिम्॥ **4.12**॥

अविकलमधिकर्तुं रक्षणे सप्तलोक्या
रघुपतिचरणेन न्यस्तदिव्यानुभावाम्।
अभजत भरतस्त्वामञ्जसा पादरक्षे !
मणिमकुटनिवेशत्यागधन्येन मूर्ध्ना॥ **4.13**॥

इयमविकलयोगक्षेमसिद्ध्यै प्रजानाम्
अलमिति भरतेन प्रार्थितामादरेण।
रघुपतिरधिरोहन्नभ्यषिञ्चत् स्वयं त्वां
चरणनखमणीनां चन्द्रिकानिर्झरेण॥ **4.14**॥

प्रणयिनि पदपद्मे गाढमाश्लिष्यति त्वां
विधिसुतकथितं तद्वैभवं ते विदन्तः।
अनुदिनमृषयस्त्वामर्चयन्त्यग्र्यगारे
रघुपतिपदरक्षे ! रामगिर्याश्रमस्थाः॥ **4.15**॥

नियतमधिरुरोह त्वामनाधेयशक्तिं
निजचरणसरोजे शक्तिमाधातुकामः।
स कथमितरथा त्वां न्यस्य रामो विजह्रे
दृषदुपचितभूमौ दण्डकारण्यभागे॥ **4.16**॥

रघुपतिपदपद्माद्रत्नपीठे निवेष्टुं
भरतशिरसि लग्नां प्रेक्ष्य पादावनि ! त्वाम्।
परिणतपुरुषार्थः पौरवर्गः स्वयं ते
विधिमभजत सर्वो वन्दिवैताळिकानाम्॥ **4.17**॥

अनन्यराजन्यनिदेशनिष्ठां
चकार पृथ्वीं चतुरर्णवान्ताम्।
भ्रातुर्यियासोर्भरतस्तदा त्वां
मूर्ध्ना वहन् मूर्तिमतीमिवाज्ञाम्॥ **4.18**॥

यद् भ्रात्रे भरताय रङ्गपतिना रामत्वमातस्थुषा
नित्योपास्यनिजाङ्घ्रिनिष्क्रयतया निश्चित्य विश्राणितम्।
योगक्षेमवहं समस्तजगतां यद्गीयते योगिभिः
पादत्राणमिदं मितम्पचकथामह्नाय मे निह्नुताम्॥ **4.19**॥

भरतस्येव ममापि
प्रशमित विश्वापवाददुर्जाता।
शेषेव शिरसि नित्यं
विहरतु रघुवीरपादुके ! भवती॥ **4.20**॥

प्रतिप्रस्थानपद्धतिः

प्रशस्ते रामपादाभ्यां
पादुके पर्युपास्महे।
आनृशंस्यं ययोरासीत्
आश्रितेष्वनवग्रहम्॥ **5.1**॥

भृशातुरसहोदरप्रणयखण्डनस्वैरिणा
पदेन किमनेन मे वनमिहावनादिच्छता।

इतीव परिहाय तन्निववृते स्वयं यत् पुरा
पदत्रमिदमाद्रिये धृतजगत्त्रयं रङ्गिणः॥ **5.2**॥

दशवदनविनाशं वाञ्छतो यस्य चक्रे
दशरथमनघोक्तिं दण्डकारण्ययात्रा।
स च भरतविमर्दे सत्यसन्धस्त्वयासीत्
रघुपतिपदरक्षे ! राजधानीं प्रयान्त्या॥ **5.3**॥

अभ्युपेतविनिवृत्तिसाहसा
देवि ! रङ्गपतिरत्नपादुके।
अत्यशेत भवती महीयसा
पारतन्त्र्यविभवेन मैथिलीम्॥ **5.4**॥

अव्याहतां रघुपतेर्वहतः प्रतिज्ञाम्
अंसाधिरोहणरसे विहते धरण्याः।
प्रादान्निवृत्य भवती मणिपादरक्षे !
स्पर्शं पदेन विगतव्यवधानखेदम्॥ **5.5**॥

मन्त्राभिषेकविरहाद्भजता विशुद्धिं
संस्कारवर्जनवशादभिसंस्कृतेन।
मूर्ध्ना निनाय भरतो मणिपादुके ! त्वां
रामाज्ञया विनिहितामिव राज्यलक्ष्मीम्॥ **5.6**॥

रक्षार्थमस्य जगतो मणिपादरक्षे !
रामस्य पादकमलं समये त्यजन्त्योः।
किं दुष्करं तव विभूतिपरिग्रहो वा
किं वा विदेहदुहितुः कृपणा दशा सा॥ **5.7**॥

सीतासखस्य सहसा चरणारविन्दात्
भक्त्या नते कृतपदा भरतोत्तमाङ्गे।
आरुह्य नागमभितो भवती वितेने
मायूरचामरभरं मणिरश्मिजालैः॥ **5.8**॥

मूर्ध्ना मुकुन्दपदरक्षिणि ! बिभ्रतस्त्वाम्
आविर्मदस्य रघुवीरमदावळस्य।
आमोदिभिस्सपदि दानजलप्रवाहैः
लेभे चिराद्वसुमती रुचिरं विलेपम्॥ **5.9**॥

आशाः प्रसाधयितुमम्ब ! तदा भवत्यां
दैवादकाण्डशरदीव समुत्थितायाम्।
स्तोकावशेषसलिलास्सहसा बभूवुः
साकेतयौवतविलोचनवारिवाहाः॥ **5.10**॥

अन्ते वसन्नचरमस्य कवेस्स योगी
वन्यान् प्रगृह्य विविधानुपदाविशेषान्।
आतस्थुषीं रघुकुलोचितमौपवाह्यम्
प्रत्युज्जगाम भवतीं भरतोपनीताम्॥ **5.11**॥

मातस्त्वदागमनमङ्गळदर्शिनीनां
साकेतपक्ष्मळदृशां चटुलाक्षिभृङ्गैः।
जातानि तत्र सहसा मणिपादरक्षे !
वातायनानि वदनैः शतपत्रितानि॥ **5.12**॥

साकेतसीम्नि भवती मणिपादरक्षे !
माङ्गल्यलाजनिकरैरवकीर्यमाणा।
कीर्तिस्वयंवरपतेर्भरतस्य काले
वैवाहिकी जननि ! वह्निशिखेव रेजे॥ **5.13**॥

छत्रेन्दुमण्डलवती मणिपादुके ! त्वं
व्याधूतचामरकलापशरप्रसूना।
सद्यो बभूविथ समग्रविकासहेतुः
साकेतपौरवनितानयनोत्पलानाम्॥ **5.14**॥

प्रैक्षन्त वक्त्रैर्मणिपादरक्षे !
शत्रुञ्जयं शैलमिवाधिरूढाम्।
रामाभिधानप्रतिपन्नहर्षैः
उत्तानितैरुत्तरकोसलास्त्वाम्॥ **5.15**॥

द्रष्टुं तदा राघवपादरक्षे !
सीतामिव त्वां विनिवर्तमानाम्।
आसन्नयोध्यापुरसुन्दरीणाम्
औत्सुक्यलोलानि विलोचनानि॥ **5.16**॥

आस्थाय तत्र स्फुटबिन्दुनादं
स्तम्बेरमं तादृशसन्निवेशम्।
अदर्शयस्त्वं पुरमध्यभागे
पादावनि ! त्वत्प्रणवाश्रयत्वम्॥ **5.17**॥

दशग्रीवस्तम्बेरमदळनदुर्दान्तहृदये
विहारस्वाच्छन्द्यात् विशति रघुसिंहे वनभुवम्।
स्ववात्सल्यक्रोडीकृतभरतशाबेव भवती
निराबाधां पादावनि ! न विजहौ कोसलगुहाम्॥ **5.18**॥

कैकेयीवरदानदुर्दिननिरालोकस्य लोकस्य यत्
त्राणार्थं भरतेन भव्यमनसा साकेतमानीयत।
रामत्यागसहैरसह्यविरहं रङ्गक्षितीन्द्रस्य तत्
पादत्राणमनन्यतन्त्रफणितेरापीडमीडीमहि॥ **5.19**॥

समुपस्थिते प्रदोषे
सहसा विनिवृत्य चित्रकूटवनात्।
अभजत पुनर्जनपदं
वत्सं धेनुरिव पादुके ! भवती॥ **5.20**॥

अधिकारपरिग्रहपद्धतिः

अधीष्टे पादुका सा मे
यस्याः साकेतवासिभिः।
अन्वयव्यतिरेकाभ्याम्
अन्वमीयत वैभवम्॥ **6.1**॥

मोचितस्थिरचरानयत्नतः
कोसलाञ्जनपदानुपास्महे।
येषु कांश्चन बभूव वत्सरान्
दैवतं दनुजवैरिपादुका॥ **6.2**॥

साम्राज्यसम्पदिव दासजनोचिता त्वं
रामेण सत्यवचसा भरताय दत्ता।
स त्वां निवेश्य चरणावनि ! भद्रपीठे
पृथ्वीं बुभोज बुभुजे च यशोविभूतिम्॥ **6.3**॥

भोगाननन्यमनसां मणिपादुके ! त्वं
पुष्णासि हन्त भजतामनुषङ्गसिद्धान्।
तेनैव नूनमभवद्भरतस्य साधोः
अप्रार्थितं तदिह राज्यमवर्जनीयम्॥ **6.4**॥

रामप्रयाणजनितं व्यपनीय शोकं
रत्नासने स्थितवती मणिपादरक्षे !।

पृथ्वीं निजेन यशसा विहितोत्तरीयाम्
एकातपत्रतिलकां भवती वितेने ॥ **6.5** ॥

रामाज्ञया परवती परिगृह्य राज्यं
रत्नासनं रघुकुलोचितमाश्रयन्ती।
शुद्धां पदावनि ! पुनर्भवती वितेने
स्वातन्त्र्यलेशकलुषां भरतस्य कीर्तिम् ॥ **6.6** ॥

पौलस्त्यवीरवदनस्तबकावसानात्
पुष्पाणि दण्डकवनेष्वपचेतुमिच्छोः।
रक्षाधुरं धृतवती मणिपादुके ! त्वं
रामस्य मैथिलसुतासहिते प्रचारे ॥ **6.7** ॥

पादावनि ! प्रचलचामरबृन्दमध्ये
भद्रासनास्तरगता भवती विरेजे।
आकीर्णदिव्यसलिले कटके सुमेरोः
अम्भोजिनीव कलहायितहंसयूथा ॥ **6.8** ॥

मान्ये रघूद्वहपदे मणिपादुके ! त्वां
विन्यस्य विग्रहवतीमिव राज्यलक्ष्मीम्।
आलोलमक्षवलयी भरतो जटावान्
आलम्ब्य चामरमनन्यमनाः सिषेवे ॥ **6.9** ॥

प्राप्ते दिवं दशरथे भरते विलक्षे
पर्याकुलेषु भृशमुत्तरकोसलेषु।
त्वं चेदुपेक्षितवती क इवाभविष्यत्
गोपायितुं गुहसखस्य विभोः पदं तत् ॥ **6.10** ॥

भ्रातुर्यदम्ब ! विरहाद् भरते विषण्णे
दाक्षिण्यमाश्रितवती मणिपादुके ! त्वम्।
आसीदशेषजगतां श्रवणामृतं तत्
वाचालकाहळसहं बिरुदं तदा ते॥ **6.11**॥

राज्यं तदा दशरथादनु रामतः प्राक्
बिभ्राणया चरणरक्षिणि ! वीतखेदम्।
तुल्याधिकारभजनेन बभूव धन्यो
वंशस्त्वयाऽम्ब ! मनुवंश महीपतीनाम्॥ **6.12**॥

वर्षाणि तानि वृषळो न तपांसि तेपे
बालो न कश्चिदपि मृत्युवशं जगाम।
राज्ये तवाम्ब ! रघुपुङ्गवपादरक्षे !
नैवापरं प्रतिविधेयमभूत् प्रसक्तम्॥ **6.13**॥

विश्वं त्वदाश्रितपदाम्बुजसम्भवायां
यस्यां प्रतिष्ठितमिदं मणिपादरक्षे !।
आसीदनन्यशरणा समये यथावत्
साऽपि त्वया वसुमती विहितप्रतिष्ठा॥ **6.14**॥

प्रायेण रामविरहव्यथिता तदानीम्
उत्सङ्गमाश्रितवती तव राज्यलक्ष्मीः।
तामेव देवि ! ननु जीवयितुं जलार्द्राम्
अङ्गीचकार भवती भरतोपनीताम्॥ **6.15**॥

वीरव्रतप्रणयिनि प्रथमे रघूणां
प्राप्ते चिराय भरते व्रतमासिधारम्।
त्यक्त्वा पदावनि ! तदा विविधान् विहारान्
एकासिकाव्रतमपूर्वमवर्तयस्त्वम्॥ **6.16**॥

काकुत्स्थपादविरहप्रतिपन्नमौनां
निष्पन्दतामुपगतां मणिपादरक्षे !।
आश्वासयन्निव मुहुर्भरतस्तदानीं
शीतैरवीजयत चामरमारुतैस्त्वाम्॥ **6.17**॥

यत्र क्वचिद्विहरतोऽपि पदारविन्दं
रक्ष्यं मया रघुपतेरिति भावयन्त्या।
निश्शेषमेव सहसा मणिपादरक्षे !
निष्कण्टकं जगदिदं विदधे भवत्या॥ **6.18**॥

रामं त्वया विरहितं भरतं च तेन
त्रातुं पदावनि ! तदा यदभूत् प्रतीतम्।
रामानुजस्य तव चाम्ब ! जगत् समस्तं
जागर्ति तेन खलु जागरणव्रतेन॥ **6.19**॥

अन्तःपुरे परिजनैः समयोपयातैः
अभ्यर्चिता भवसि या विनयोपपन्नैः।
सा कोसलेश्वरपदावनि ! भूपतीनां
सङ्घट्टनं मकुटपङ्क्तिभिरन्वभूस्त्वम्॥ **6.20**॥

प्राप्याधिकारमुचितं भुवनस्य गुप्त्यै
भद्रासनं भरतवन्दितमाश्रयन्त्या।
मध्येऽवतीर्णमिव माधवपादरक्षे !
मातस्त्वयाऽपि मनुवंशमहीपतीनाम्॥ **6.21**॥

राजासने रघुकुलोद्वहपादरक्षे !
नीराजनं समभवत् समयोचितं ते।
श्लाघावशेन बहुशः परिघूर्णिताभिः
सामन्तमौळिमणिमङ्गळदीपिकाभिः॥ **6.22**॥

पृथ्वीपतीनां युगपत् किरीटाः
प्रत्यर्थिनां प्राणितुमर्थिनां च।
प्रापुस्तदा राघवपादरक्षे !
त्वदीयमास्थानिकपादपीठम्॥ **6.23**॥

प्रणम्य रङ्गेश्वरपादरक्षे !
दूरोपनीतैरुपदाविशेषैः।
सभाजयन्ति स्म तदा सभायाम्
उच्चैस्तरामुत्तरकोसलास्त्वाम्॥ **6.24**॥

अपावृतद्वारमयन्त्रिताश्वं
रङ्गेशपादावनि ! पूर्वमासीत्।
त्वया यदृच्छासुखसुप्तपान्थं
रामे वनस्थेऽपि पदं रघूणाम्॥ **6.25**॥

अनन्यभक्तिर्मणिपादुके ! त्वाम्
अभ्यर्चयन् दाशरथिर्द्वितीयः।
विकल्प्यमानः प्रथमेन कीर्त्या
वन्द्यः स्वयं व्योमसदां बभूव॥ **6.26**॥

अरण्ययोग्यं पदमस्पृशन्ती
रामस्य राजार्हपदे निविष्टा।
आस्थाननित्यासिकया निरास्थः
स्वर्गौकसां स्वैरगतेर्विघातम्॥ **6.27**॥

राजासने चेद्भवती निषण्णा
रङ्गेशपादावनि ! तन्न चित्रम्।
यत्राधिरूढाः क्रमशः पुरा त्वाम्
उत्तंसयन्ते रघुसार्वभौमाः॥ **6.28**॥

भद्रासनं चेत् परिवृत्तमासीत्
देवि ! क्षणं दक्षिणतोमुखं ते।
कथं भवेत् काञ्चनपादरक्षे !
रामस्य रक्षोमृगयाविहारः॥ **6.29**॥

यावत् त्वया राघवपादरक्षे !
जिगीषिता राक्षसराजधानी।
मालेव तावल्लुळिता मदान्धैः
उद्यानशाखामृगयूथपैस्ते॥ **6.30**॥

महीक्षितां राघवपादरक्षे !
भद्रासनस्थां भवतीं स्पृशन्तः।
पूर्वं तथात्वे नियतेऽपि भूयः
कल्याणतामानशिरे किरीटाः॥ **6.31**॥

अनिच्छतः पाण्डरमातपत्रं
पित्रा वितीर्णं मणिपादरक्षे !।
आसीत् त्वदर्थं विधृतेन तेन
छाया समग्रा भरतस्य मौळौ॥ **6.32**॥

पादुके ! रघुपतौ यदृच्छया
प्रस्थिते वनविहारकौतुकात्।
आधिराज्यमधिगम्य ते युवाम्
अक्षतं वसुमतीमरक्षतम्॥ **6.33**॥

रघुवीरपदानुषङ्गमात्रात्
परिबर्हेषु निवेशिता यदि त्वम्।
अधिकारदिने कथं पुनस्ते
परिवारास्तव पादुके ! बभूवुः॥ **6.34**॥

पुरुषार्थचतुष्टयार्थिनीनां
परिषत् ते महिता वसिष्ठमुख्यैः।
क्रयविक्रयपट्टणं प्रजानाम्
अभवत् काञ्चनपादुके ! तदानीम्॥ **6.35**॥

मनुजत्वतिरोहितेन शक्ये
वपुषैकेन विरोधिनां निरासे।
अभजद्धरतादिभेदमीशः
स्वयमाराधयितुं पदावनि ! त्वाम्॥ **6.36**॥

मगधाङ्गकळिङ्गवङ्गमुख्यान्
विमतान् रन्ध्रगवेषिणः ससैन्यान्।
रघुपुङ्गवपादुके ! विजिग्ये
भरतः शासनमुद्वहन् भवत्याः॥ **6.37**॥

अनितरवहनीयं मन्त्रिमुख्यैर्यदा तत्
त्वयि विनिहितमासीत् सूर्यवंशाधिराज्यम्।
रघुपतिपदरक्षे ! रत्नपीठे तदानीं
श्रियमिव ददृशुस्त्वां सादरं लोकपालाः॥ **6.38**॥

परिहृतदण्डकाध्वगमनं पदरक्षिणि ! तत्
परिणतविश्वसम्पदुदयं युवयोर्द्वितयम्।
रघुपतिरत्नपीठमधिरुह्य तदा विदधे
व्यपगतवैरिभूपनिलयं वसुधावलयम्॥ **6.39**॥

प्राप्तोदया तदानीं
किमपि तमस्तन्निराकरोद्भवती।
तनुरिव मनुकुलजनुषां
प्रसवित्री रत्नपादुके ! सवितुः॥ **6.40**॥

अभिषेकपद्धतिः

पाहि नः पादुके ! यस्याः
विधास्यन् अभिषेचनम्।
आभिषेचनिकं भाण्डं
चक्रे रामः प्रदक्षिणम्॥ **7.1**॥

राघवस्य चरणौ पदावनि !
प्रेक्षितुं त्वदभिषेकमीषतुः।
आभिषेचनिकभाण्डसन्निधौ
यत्प्रदक्षिणगतिः शनैर्ययौ॥ **7.2**॥

मूर्धाभिषिक्तैर्नियमेन वाह्यौ
विचिन्त्य नूनं रघुनाथपादौ।
रत्नासनस्थां मणिपादुके ! त्वां
रामानुजन्मा भरतोऽभ्यषिञ्चत्॥ **7.3**॥

भ्रातुर्नियोगेऽप्यनिवर्तमानं
राज्याभिषेकं च परित्यजन्तम्।
रामानुजौ तौ ननु पारतन्त्र्यात्
उभावुभाभ्यां भवती जिगाय॥ **7.4**॥

निवेश्य रङ्गेश्वरपादरक्षे !
भद्रासने सादरमभ्यषिञ्चत्।
वशी वसिष्ठो मनुवंशजानां
महीक्षितां वंशपुरोहितस्त्वाम्॥ **7.5**॥

कृताभिषेका भवती यथावत्
रङ्गेशपादावनि ! रत्नपीठे।

गङ्गानिपातस्नपितां सुमेरोः
अधित्यकाभूमिमधश्चकार ॥ **7.6** ॥

वसिष्ठमुख्यैर्विहिताभिषेकां
राज्यासने रामनिवेशयोग्ये।
तुष्टाव रङ्गेश्वरपादरक्षे !
प्राचेतसस्त्वां प्रथमः कवीनाम् ॥ **7.7** ॥

रक्षोवधार्थं मणिपादरक्षे !
रामात्मनो रङ्गपतेः प्रवासे।
रक्षोपकाराद्भवती वितेने
राजन्वतीं कोसलराजधानीम् ॥ **7.8** ॥

प्राप्ताभिषेका मणिपादरक्षे !
प्रतापमुग्रं प्रतिपद्यमाना।
शशास पृथ्वीं भवती यथावत्
साकेतसिंहासनसार्वभौमी ॥ **7.9** ॥

दशाननादीन् मणिपादरक्षे !
जिगीषतो दाशरथेर्वियोगात्।
जातोपतापा त्वयि संप्रयुक्तैः
तीर्थोदकैरुच्छ्वसिता धरित्री ॥ **7.10** ॥

अध्यासितं मनुमुखैः क्रमशो नरेन्द्रैः
आरोप्य देवि ! भवतीं तपनीयपीठम्।
राज्याभिषेकमनघं मणिपादरक्षे !
रामोचितं तव वशं भरतो वितेने ॥ **7.11** ॥

स्नेहेन देवि ! भवतीं विषयेऽभिषिञ्चन्
द्विस्सप्तसङ्ख्यभुवनोदरदीपरेखाम्।
जातं रघूद्वहदिवाकरविप्रयोगात्
अन्धं तमिस्रमहरद्भरतः प्रजानाम् ॥ 7.12 ॥

हस्तापचेयपुरुषार्थफलप्रसूतेः
मूलं पदावनि ! मुकुन्दमहीरुहस्त्वम्।
छायाविशेषमदिशद्यदसौ प्रजानाम्
आवर्जितैस्त्वयि शुभैरभिषेकतोयैः ॥ 7.13 ॥

अह्नाय रामविरहात्परिखिन्नवृत्तेः
आश्वासनाय भवती मणिपादरक्षे !।
तीर्थाभिषेकमपदिश्य वसुन्धरायाः
चक्रे तदा समुचितं शिशिरोपचारम् ॥ 7.14 ॥

मालिन्यमाश्रितवती मणिपादरक्षे !
पङ्केन केकयसुताकलहोत्थितेन।
शुद्धिं परामधिजगाम वसुन्धरेयं
त्वत्तः क्षणान्निपतितैरभिषेकतोयैः ॥ 7.15 ॥

आवर्जितं मुनिगणेन जगद्विभूत्यै
तोयं पदावनि ! तदा त्वयि मन्त्रपूतम्।
मूलावसेकसलिलं निगमद्रुमाणां
शापोदकं च समभूत्क्षणदाचराणाम् ॥ 7.16 ॥

विप्रोषिते रघुपतौ भवती यथार्हं
मान्ये पदे स्थितिमती मनुवंशजानाम्।
आत्मन्यथर्वनिपुणैः प्रहितैः प्रजानाम्
अश्रूण्यपास्यदभिषेकजलप्रवाहैः ॥ 7.17 ॥

प्रायो विशोषितरसा पतिविप्रयोगात्
पर्याकुलीकृतसमुद्रपयोधरा गौः।
अम्ब ! त्वदीयमभिषेकपयः पिबन्ती
धेनुर्बभूव जगतां धनधान्यदोग्ध्री॥ **7.18**॥

वृत्ते यथावदभिषेकविधौ बभासे
पश्चात्तवाम्ब ! भरतेन धृतः किरीटः।
आकस्मिकस्वकुलविप्लवशान्तिहर्षात्
प्राप्तस्त्विषामिव पतिर्मणिपादुके ! त्वाम्॥ **7.19**॥

मनुवंशपुरोहितेन मन्त्रैः
अभिमन्त्र्य त्वयि पादुके ! प्रयुक्तम्।
अभिषेकजलं क्षणेन राज्ञां
शमयामास समुत्थितान् प्रतापान्॥ **7.20**॥

पादपादुपहृता रघूद्वहात्
आलवालमिव पीठमाश्रिता।
अभ्यषेचि भवती तपोधनैः
पारिजातलतिकेव पादुके !॥ **7.21**॥

अलघुभिरभिषेकव्यापृतैरम्बुभिस्ते
दिनकरकुलदैन्यं पादुके ! क्षाळयिष्यन्।
स खलु कमलयोनेः सूनुराधत्त मन्त्रे -
ष्वधिकनियमयोगां शक्तिमाथर्वणेषु॥ **7.22**॥

दिनकरकुलजानां देवि ! पृथ्वीपतीनां
निरुपधिमधिकारं प्राप्नुवत्यां भवत्याम्।
अजनिषत समस्ताः पादुके ! तावकीन -
स्नपनसलिलयोगान्निम्नगास्तुङ्गभद्राः॥ **7.23**॥

तव विधिवदुपात्ते सार्वभौमाभिषेके
भरतसमयविद्भिः पादुके ! मन्त्रिमुख्यैः।
त्वदवधिनिजकर्मस्थायिनीनां प्रजानां
प्रथमयुगविशेषाः प्रादुरासन् विचित्राः॥ **7.24**॥

अवसितरिपुशब्दानन्वभूस्त्वं तदानीं
रघुपतिपदरक्षे ! लब्धराज्याभिषेका।
चलितभुजलतानां चामरग्राहिणीनां
मणिवलयनिनादैर्मेदुरान् मन्त्रघोषान्॥ **7.25**॥

समुचितमभिषेकं पादुके ! प्राप्नुवत्यां
त्वयि विनिपतितानां देवि ! तीर्थोदकानाम्।
ध्वनिरनुगतमन्त्रः सीदतां कोसलानां
शमयितुमलमासीत्सङ्कुलानार्तनादान्॥ **7.26**॥

दिविषदनुविधेयं देवि ! राज्याभिषेकं
भरत इव यदि त्वं पादुके ! नान्वमंस्थाः।
कथमिव रघुवीरः कल्पयेदल्पयत्नः
त्रिचतुरशरपातैस्तादृशं देवकार्यम्॥ **7.27**॥

कतिचन पदपद्मस्पर्शसौख्यं त्यजन्ती
व्रतमतुलमधास्त्वं वत्सरान् सावधाना।
रघुपतिपदरक्षे ! राक्षसैस्त्रासितानां
रणरणकविमुक्तं येन राज्यं सुराणाम्॥ **7.28**॥

अथर्वोपज्ञं ते विधिवदभिषेकं विदधतां
वसिष्ठादीनामप्युपचितचमत्कारभरया।
त्वदास्थान्या रङ्गक्षितिरमणपादावनि ! तदा
लघीयस्यो जाता रघुपरिषदाहोपुरुषिकाः॥ **7.29**॥

अभिषेचयतु स रामः
पदेन वा स्पृशतु पादुके ! भवतीम्।
अविशेषितमहिमा त्वं
क्व वा विशेषः क्षमासमेतानाम्॥ **7.30**॥

निर्यातनापद्धतिः

अभिषेकोत्सवात्तस्मात्
यस्या निर्यातनोत्सवः।
अत्यरिच्यत तां वन्दे
भव्यां भरतदेवताम्॥ **8.1**॥

उपास्य वर्षाणि चतुर्दश त्वाम्
उत्तारिकामुत्तरकोसलस्थाः।
सनन्दनाद्यैरपि दुर्विगाहं
सान्तानिकं लोकमवापुरग्र्यम्॥ **8.2**॥

पादावनि ! प्रत्ययितो हनूमान्
सीतामिव त्वां चिरविप्रयुक्ताम्।
प्रणम्य पौलस्त्यरिपोरुदन्तं
विज्ञापयामास विनीतवेषः॥ **8.3**॥

तवाभिषेकान्मणिपादरक्षे !
मूले निषेकादिव वृद्धियोग्यात्।
जहुस्तदैव त्रिदशाङ्गनानां
प्रम्लानतां पत्रलताङ्कुराणि॥ **8.4**॥

सर्वतस्त्वदभिषेकवासरे
सम्यगुद्धृतसमस्तकण्टके।

राघवस्य विपिनेषु पादुके !
यत्र कामगमता व्यवस्थिता ॥ **8.5** ॥

किं चतुर्दशभिरेव वत्सरैः
नित्यमेव मणिपादुके युवाम्।
पादयोस्त्रिभुवनाधिराजयोः
यौवराज्यमधिगच्छतं स्वयम् ॥ **8.6** ॥

रामस्य राक्षसवधत्वरितस्य काले
पादावनि ! प्रकटयन्निव पार्ष्णिगुप्तिम्।
आचित्रकूटमधिगम्य शशंस वार्ताम्
अव्याहतत्वदभिषेकमृदङ्गनादः ॥ **8.7** ॥

भद्राणि देवि ! जगतां प्रतिपादयिष्यन्
प्रागेव येन भवतीं भरतोऽभ्यषिञ्चत्।
मन्ये कपीश्वरविभीषणयोर्यथावत्
सन्तन्यते स्म तत एव किलाभिषेकः ॥ **8.8** ॥

सम्भिद्यमानतमसासरयूपनीतैः
संवर्धितस्तव शुभैरभिषेकतोयैः।
मन्ये बभूव जलधिर्मणिपादरक्षे !
रामास्त्रपावकशिखाभिरशोषणीयः ॥ **8.9** ॥

पादावनि ! त्वदभिषेचनमङ्गलार्थं
भेरीशतं भृशमताड्यत यत्प्रतीतैः।
आकर्ण्य तस्य सहसा तुमुलं निनादं
लङ्काकवाटनयनानि निमीलितानि ॥ **8.10** ॥

तापोद्गमस्त्वदभिषेकजलप्रवाहैः
उत्सारितस्त्वरितमुत्तरकोसलेभ्यः।
लेभे चिराय रघुपुङ्गवपादरक्षे !
लङ्कावरोधसुदृशां हृदयेषु वासम् ॥ **8.11** ॥

आवर्जितं विधिविदा मणिपादरक्षे !
पद्मासनप्रियसुतेन पुरोहितेन।
आसीन्निदानमभिषेकजलं त्वदीयं
नक्तञ्चरप्रणयिनीनयनोदकानाम् ॥ **8.12** ॥

देवि ! त्वया स्नपनसम्पदि संश्रितायां
दग्धे पुरे दशमुखस्य वलीमुखेन।
आसीत्ततः प्रभृति विश्वजनप्रतीतम्
अद्भ्योऽग्निरित्यवितथं वचनं मुनीनाम् ॥ **8.13** ॥

आयोध्यकैस्त्वदभिषेकसमिद्धहर्षैः
आध्मापिताः श्रुतिसुखं ननु ते तदानीम्।
रामस्य राक्षसशिरोलवनेऽप्यशाम्यन्
येषां ध्वनिर्विजयशङ्खरवो बभूव ॥ **8.14** ॥

प्रथयितुमभिषेकं पादुके ! तावकीनं
दुरितशमनदक्षे दुन्दुभौ ताड्यमाने।
सपदि परिगृहीतं साध्वसं देवि ! नूनं
दशवदनवधूनां दक्षिणैर्नेत्रकोशैः ॥ **8.15** ॥

रघुपतिपदरक्षे ! रत्नपीठे यदा त्वाम्
अखिलभुवनमान्यामभ्यषिञ्चद्वसिष्ठः।
दशमुखमहिषीभिर्देवि ! बाष्पायिताभिः
स्तनयुगमभिषेक्तुं तत्क्षणादन्वमंस्थाः ॥ **8.16** ॥

रामास्त्राणि निमित्तमात्रमिह ते लब्धाभिषेका स्वयं
रक्षस्तत्क्षपयाञ्चकार भवती भद्रासनस्थायिनी।
यद्दोष्णामतिवेलदर्पदवथुज्वालोष्मलानां तदा
निष्पिष्टैः कलधौतशैलशिखरैः कर्पूरचूर्णायितम्॥ **8.17**॥

श्रुत्वैवं हनुमन्मुखाद्रघुपतेः प्रत्यागतिं तत्क्षणात्
आसीदद्भरतानुवर्तनवशादारूढकुम्भस्थलाम्।
कालोन्निद्रकदुष्णदानमदिरामाद्यद्द्विरेफध्वनि -
श्लाघाचाटुभिरस्तुतेव भवतीं शत्रुञ्जयः कुञ्जरः॥ **8.18**॥

प्रत्यागतस्य भवतीमवलोक्य भर्तुः
पादारविन्दसविधे भरतोपनीताम्।
पूर्वाभिषेकविभवाभ्युचितां सपर्यां
मध्ये सतामकृत मैथिलराजकन्या॥ **8.19**॥

सम्प्रेक्ष्य मैथिलसुता मणिपादरक्षे !
प्रत्युद्गतस्य भवतीं भरतस्य मौलौ।
निर्दिश्य सा निभृतमञ्जलिना पुरस्तात्
तारादिकाः प्रियसखीरशिषत्प्रणन्तुम्॥ **8.20**॥

तुल्येऽपि देवि ! रघुवीरपदाश्रयत्वे
पूर्वाभिषेकमधिगम्य गरीयसी त्वम्।
तेनैव खल्वभजतां मणिपादरक्षे !
रक्षःप्लवङ्गमपती भवतीं स्वमूर्ध्ना॥ **8.21**॥

निर्वृत्तराक्षसचमूमृगयाविहारो
रङ्गेश्वरः स खलु राघववंशगोप्ता।
वंशक्रमादुपनतं पदमाददानो
मान्यं पुनस्त्वयि पदं निदधे स्वकीयम्॥ **8.22**॥

तत्तादृशोश्चरणयोः प्रणिपत्य भर्तुः
पौरास्त्वया विधृतयोः प्रतिपन्नसत्त्वाः।
प्राप्ताभिषेकविभवामपि पादुके ! त्वाम्
आनन्दबाष्पसलिलैः पुनरभ्यषिञ्चन्॥ **8.23**॥

मातस्त्वयैव समये विषमेऽपि सम्यक्
राजन्वतीं वसुमतीमवलोक्य रामः।
सञ्जीवनाय भरतस्य समग्रभक्तेः
सत्यप्रतिश्रवतयैव चकार राज्यम्॥ **8.24**॥

पादावनि ! प्रतिगतस्य पुरीमयोध्यां
पौलस्त्यहन्तुरभिषेकजलार्द्रमूर्तेः।
अंसे यथार्हमधिवास्य निजैर्यशोभिः
कस्तूरिकेव निहिता वसुधा त्वयैव॥ **8.25**॥

याऽसौ चतुर्दश समाः पतिविप्रयुक्ता
विश्वम्भरा भगवती विधृता भवत्या।
विन्यस्य तां रघुपतेर्भुजशैलशृङ्गे
भूयोऽपि तेन सहितां भवती बभार॥ **8.26**॥

निस्तीर्णदुःखजलधेरनघस्य देवि !
त्वत्सम्प्रयुक्तरघुनाथपदान्वयेन।
सद्यः सनन्दनमुखैरपि दुर्निरीक्षा
साम्राज्यसम्पदपरा भरतस्य जज्ञे॥ **8.27**॥

निर्गत्य देवि ! भरताञ्जलिपद्ममध्यात्
भूयः समागतवती पुरुषोत्तमेन।
पद्मेव भद्रमखिलं मणिपादरक्षे
प्रादुश्चकार भवती जगतां त्रयाणाम्॥ **8.28**॥

रघुपतिमधिरोप्य स्वोचिते रत्नपीठे
प्रगुणमभजथास्त्वं पादुके ! पादपीठम्।
तदपि बहुमतिस्ते तादृशी नित्यमासीत्
क्व नु खलु महितानां कल्प्यते तारतम्यम्॥ **8.29**॥

अनुवृत्तरामभावः
शङ्के निर्विष्टचक्रवर्तिपदाम्।
अधुनाऽपि रङ्गनाथः
सचमत्कारं पदेन भजति त्वाम्॥ **8.30**॥

सुभाषितपद्धतिः

कलासु काष्ठामातिष्ठन्
भूम्ने सम्बन्धिनामपि।
पादुका रङ्गधुर्यस्य
भरताराध्यतां गता॥ **28.1**॥

सन्तः स्वदेशपरदेशविभागशून्यं
हन्त स्ववृत्तिमनघां न परित्यजन्ति।
राज्ये वने च रघुपुङ्गवपादरक्षा
नैजं जहौ न खलु कण्टकशोधनं तत्॥ **28.2**॥

ब्रह्मास्त्रतामधिजगाम तृणं प्रयुक्तं
पुण्यं शरव्यमभवत् पयसान्निधिर्वा।
पृथ्वीं शशास परिमुक्तपदं पदत्रं
किं वा न किं भवति केळिविधौ विभूनाम्॥ **28.3**॥

अन्येषु सत्स्वपि नरेन्द्रसुतेषु दैवात्
भ्रष्टः पदादधिकरोति पदं पदार्हः।

प्रायो निदर्शयति तत् प्रथमो रघूणां
तत्पादयोः प्रतिनिधी मणिपादुके वा॥ **28.4**॥

चरणमनघवृत्तेः कस्यचित्प्राप्य नित्यं
सकलभुवनगुप्त्यै सत्पथे वर्तते यः।
नरपतिबहुमानं पादुकेवाधिगच्छन्
स भवति समयेषु प्रेक्षितज्ञैरुपास्यः॥ **28.5**॥

रामे राज्यं पितुरभिमतं सम्मतं च प्रजानां
माता वव्रे तदिह भरते सत्यवादी ददौ च।
चिन्तातीतः समजनि तदा पादुकाग्र्याभिषेको
दुर्विज्ञानस्वहृदयमहो दैवमत्र प्रमाणम्॥ **28.6**॥

नातिक्रामेच्चरणवहनात्पादुका पादपीठं
यद्वाऽऽसन्नं परमिह सदा भाति राजासनस्य।
पूर्वत्रैव प्रणिहितमभूद्धन्त रामेण राज्यं
शङ्के भर्तुर्बहुमतिपदं विक्रमे साहचर्यम्॥ **28.7**॥

प्रतिपदचपलाऽपि पादुका
रघुपतिना स्वपदे निवेशिता।
समजनि निभृतस्थितिस्तदा
भवति गुणः श्रियमभ्युपेयुषाम्॥ **28.8**॥

गतिहेतुरभूत् क्वचित्पदे
स्थितिहेतुर्मणिपादुका क्वचित्।
न हि वस्तुषु शक्तिनिश्चयो
नियतिः केवलमीश्वरेच्छया॥ **28.9**॥

अधरीकृतोऽपि महता
तमेव सेवेत सादरं भूष्णुः।
अलभत समये रामात्
पादाक्रान्ताऽपि पादुका राज्यम्॥ **28.10**॥

फलपद्धतिः

जयति यतिराजसूक्तिः
जयति मुकुन्दस्य पादुकायुगळी।
तदुभयधनास्त्रिवेदीम्
अवन्ध्ययन्तो जयन्ति भुवि सन्तः॥ **32.38**॥

****

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः॥ **1.1**॥

भरताय परं नमोऽस्तु तस्मै
प्रथमोदाहरणाय भक्तिभाजाम्।
यदुपज्ञमशेषतः पृथिव्यां
प्रथितो राघवपादुकाप्रभावः॥ **1.2**॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे श्री पादुका रामायणं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥